## ईद्यति। (६५/२८४३)

ईकारः आदेशो भवति आकारान्तस्याङ्गस्य यति [1]परतः। देयम्। धेयम्। हेयम्। [2]स्तेयम्॥

## घुमास्थागापाजहातिसां हलि। (६६/२४६२)

घुसञ्ज्ञकानाम् अङ्गानां, मा स्था गा पा जहाति सा इत्येतेषां हलादौ क्ङिति [3]प्रत्यये परतः ईकारादेशो भवति। दीयते। धीयते। देदीयते। देधीयते। [4]मीयते। मेमीयते। स्थीयते। तेष्ठीयते। गीयते। जेगीयते। अध्यगीष्ट, अध्यगीषाताम्, अध्यगीषत। पीयते। पेपीयते। पातेरिह ग्रहणं नास्ति, लुग्विकरणत्वात्। पायते इत्येव तस्य भवति। हीयते। जेहीयते। जहातेरिह निर्देशात् जिहातेर्ग्रहणं न भवति। हायते। '[5]षोऽन्त–कर्मणि' (धा. पा. ११४८)। अवसीयते। [6]अवसेसीयते। हलि इति किम्? ददतुः। ददुः। आतो लोपाद्धि परत्वाद् [7]ईत्वं स्यात्। एतदेव हल्ग्रहणं ज्ञापकम् अस्मिन् प्रकरणे विप्रतिषेधेनासिद्धत्वं भवति[8]। क्ङिति इत्येव, दाता। धाता॥

## [9]एर्लिङि। (६७/२३७४)

घुमास्थागापाजहातिसामङ्गानां लिङि[10] परतः एकारादेशो भवति। देयात्। धेयात्। मेयात्। स्थेयात्। गेयात्। पेयात्। हेयात्। अवसेयात्। क्ङिति इत्येव, दासीष्ट। धासीष्ट॥

## वाऽन्यस्य संयोगादेः। (६८/२३७८)

घ्वादिभ्यः अन्यस्य संयोगादेराकारान्तस्य[11] वा एकारादेशो भवति[12] लिङि परतः। ग्लेयात्, ग्लायात्। म्लेयात्, म्लायात्। अन्यस्य इति किम्? स्थेयात्। संयोगादेः इति किम्? यायात्। क्ङिति इत्येव, ग्लासीष्ट। [13]अङ्गस्य इत्येव, निर्वायात्॥

## न ल्यपि। (६९/३३३५)

ल्यपि प्रत्यये परतः घुमास्थागापाजहातिसां यदुक्तं तन्न[14]। प्रदाय। प्रधाय। प्रमाय। प्रस्थाय। प्रगाय। प्रपाय। प्रहाय। [15]अवसाय॥

## मयतेरिदन्यतरस्याम्। (७०/३३१८)

मयतेरिकारादेशो वा भवति ल्यपि परतः। अपमित्य, अपमाय॥

---

1. प्रत्यये इत्यधिकम् फ. 2. गेयम् फ, म्लेयम् क. ब. ह, मेयम् इत्यधिकम् ह. 3. प्रत्यये नास्ति क. 4-5. नास्ति फ. 6. अवसेषीयते ब. ड. 7. दीर्घत्वम् फ. 8. इति इत्यधिकम् फ. 9. इदं सूत्रमेव नास्ति ह. 10. हलादौ क्ङिति आर्धधातुके इत्यधिकम् फ. 11. अङ्गस्य इत्यधिकम् फ. ह. 12. आर्धधातुके इत्यधिकम् ह. 13. वाक्यमिदं नास्ति ह. 14. भवति इत्यधिकम् क. ब. फ. ई. 15. नास्ति ई, प्रसाय ह.